कुल प्रश्नों की संख्या : 18 ]

[ कुल मुद्रित पृष्ठों की संख्या : 8

# B-231090–A

## विषय : संस्कृत

समय : 3 घण्टे ]

[ पूर्णांक : 75

*निर्देश* : (*i*) सर्वे प्रश्नाः समाधेयाः।

(*ii*) उत्तराणि सुन्दराणि सुस्पष्टानि च भवेयुः।

---

**प्रश्न–1** ( अ ) उचितं विकल्पं चित्वा लिखत— [1×5=5]

(*i*) स्वामिना आत्मानन्देन लिखितम्—

( क ) गीता रहस्यम् ( ख ) गीता तत्त्वचिन्तनम्

( ग ) गीता माहात्म्यम् ( घ ) गीता व्याकरणम्

(*ii*) स्नेहम् आख्याति—

( क ) भोजनम् ( ख ) भाषितम्

( ग ) विनयः ( घ ) सम्भ्रमः

(*iii*) "कविना कालिदासेन मेघदूतं रचितम्।" इत्यत्र रेखाङ्कितपदस्य विभक्तिः अस्ति—

( क ) द्वितीया ( ख ) तृतीया

( ग ) प्रथमा ( घ ) चतुर्थी



StudentSuvidha.com
downloaded from
Download all NOTES and PAPERS at StudentSuvidha.com

(iv) "वागीशः सर्वत्र पूज्यते।" इति वाक्ये रेखाङ्कितस्य समुचितसन्धिविच्छेदो वर्तते—

(क) वाग् + ईशः

(ख) वाक् + ईशः

(ग) वागि + ईशः

(घ) वागी + ईशः

(v) "पुत्रः पितरम् अनुगच्छति।" इत्यत्र रेखाङ्कितपदेऽस्ति—

(क) अनु-प्रत्ययः

(ख) अनु-उपसर्गः

(ग) अनु-धातुः

(घ) अनु-धात्वंशः

**(ब)** उचितं विकल्पं चित्वा रिक्तस्थानानि पूरयत् वाक्यं पुनः लिखत— [1×5=5]

(सङ्गात्, सप्तमी, भ्रमणाय, पर्वतीकृत्य, अरोचत)

(i) त्वं —— कुत्र गमिष्यसि।

(ii) मह्यं पायसम् ——।

(iii) —— स्वर्गं न गच्छति।

(iv) परगुण-परमाणुन् —— नित्यम्।

(v) 'सरिति' इति पदे —— विभक्तिः अस्ति।

**(स)** स्तम्भस्य सुमेलनं कुरुत— [1×5=5]

| (क) | (ख) |
|---|---|
| (i) प्रायोगिकः | स्वामि-आत्मानन्दः |
| (ii) ग्रामं निकषा | अक्षिणी |
| (iii) वर्तस्व | ठक् |
| (iv) धनीरामः | क्रीडाक्षेत्रं वर्तते |
| (v) सूर्यचन्द्रमसौ | लोट् लकारस्य एकवचनम् |

downloaded from StudentSuvidha.com

Download all NOTES and PAPERS at StudentSuvidha.com

**प्रश्न-2** निम्नलिखितयोः अङ्कयोः अनुवादं संस्कृतभाषया कुरुत— [1×2=2]

(क) एक सौ सोलह (116)

(ख) एक सौ उनतालीस (139)

**प्रश्न-3** निम्नलिखितयोः रेखाङ्कितपदयोः सन्धिविच्छेदं कृत्वा तयोः नाम्नी लिखत— [1×2=2]

(क) सर्वत्र सौरभाणां प्रसरः।

(ख) मनोहरः मधुरं गायति।

**प्रश्न-4** निम्नरेखाङ्कितयोः प्रकृतिं प्रत्ययं च योजयित्वा वाक्यं पूर्णं लिखत— [1×2=2]

(क) उषा (खाद् + क्त्वा) भ्रमति।

(ख) सत्संगतिः सर्वत्र दुर्लभ + आ (टाप्)।

**प्रश्न-5** यथानिर्देशं वाच्यं परिवर्तयत— [1×2=2]

(क) शिष्याः गुरुन् नमन्ति। (कर्मवाच्ये)

(ख) मया त्वं दृश्यसे। (कर्तृवाच्ये)

**प्रश्न-6** अधोलिखित गद्यांशात् त्रीणि अव्ययपदानि चित्वा लिखत— [1×3=3]

यदि अन्यथा न मन्यसे तर्हि बृहत् परिवारः एव युष्मदीयं दुःखकारणम्।

**प्रश्न-7** अधोलिखित रेखाङ्कितपदानां समास-विग्रहं कृत्वा तेषां नामान्यपि लिखत— [1×3=3]

(क) अग्निहोत्री प्रतिदिनं जुहोति।

(ख) जैनपरम्परायां दिगम्बरः मुनिः भवति।

(ग) ज्ञानहीनः नरः दुःखं लभते।

**प्रश्न-8** अधोलिखितानि वाक्यानि (कारकदृष्ट्या) संशोधयत— [1×3=3]

(क) भवान् कुत्र गच्छन्ति।

(ख) सः चौरेण बिभेति।

(ग) वयं विद्यालये गच्छामः।

P.T.O.


Download all NOTES and PAPERS at StudentSuvidha.com

**प्रश्न-9** अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारेण प्रदत्तप्रश्नानाम् उत्तराणि लिखत— [1×3=3]

"अग्रिमे दिने स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान्। न्यायाधीशो बंकिमचन्द्रः उभाभ्यां पृथक्-पृथक् विवरणं श्रुतवान्। सर्वं वृत्तमवगत्य स तं निर्दोषम् अमन्यत आरक्षिणं च दोषभाजनम्। किन्तु प्रमाणाभावात् स निर्णेतुं नाशक्नोत्। ततो तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान्।"

*प्रश्नाः*

(क) "सर्व वृत्तम् अवगत्य स तं निर्दोषम् अमन्यत आरक्षिणं च दोषभाजनम्।" इति वाक्यस्य हिन्दी भाषया अनुवादं कुरुत।

(ख) "अग्रिमे दिने" इत्यनयोः पदयोः विशेष्यपदं किम्?

(ग) "न्यायाधीशो बंकिमचन्द्रः उभाभ्यां पृथक्-पृथक् विवरणं श्रुतवान्।" इत्यस्य वाक्यस्य क्रियापदं किम्?

**प्रश्न-10** अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारेण प्रदत्त प्रश्नानाम् उत्तराणि लिखत— [1×3=3]

"बिलासा शैशवकाले बालाबालैः सह क्रीडति स्म। तस्यै बालकानां क्रीडनकं क्रीडनं च रोचते स्म। बिलासा अदम्य-साहसिका आसीत्। एकदा सुप्तं बालं नीत्वा वृक्कः पलायनं कुर्वन् आसीत्। तदा बिलासा वृक्कं दण्डेन ताडयित्वा बालकं मुक्तं कृत्वा मातरं समर्पयत्। बालकैः सह बिलासा मल्लकौशलं शिक्षते स्म।"

*प्रश्नाः*

(क) "तस्यै बालकानां क्रीडनकं क्रीडनं च रोचते स्म।" इति वाक्यस्य हिन्दीभाषया अनुवादं कुरुत।

(ख) "बिलासा शैशवकाले बालाबालैः सह क्रीडति स्म।" इत्यस्मिन् वाक्ये क्रियापदं किम्?

(ग) "सुप्तं बालं" इत्यनयोः पदयोः विशेष्यपदं किमस्ति?

downloaded from StudentSuvidha.com



Download all NOTES and PAPERS at StudentSuvidha.com

**प्रश्न-11** अधोलिखितं श्लोकं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत— [1×3=3]

शस्त्रहता न हि हता रिपवो भवन्ति,
प्रज्ञाहतास्तुरिपव: सुहता भवन्ति।
शस्त्रं निहन्ति पुरुषस्य शरीरमेकं,
प्रज्ञा कुलञ्च विभवञ्च यशश्च हन्ति॥

*प्रश्ना:*

(क) "शस्त्रहता न हि हता रिपवो भवन्ति।" इत्यस्य हिन्दीभाषया अनुवादं कुरुत।

(ख) रिपव: कदा सुहता: भवन्ति?

(ग) प्रज्ञा पुरुषस्य किं किं हन्ति? (हिन्दी भाषया उत्तरत)

**प्रश्न-12** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत— [1×3=3]

माता गुरुतरा भूमे: खादप्युच्चतर: पिता।
मन: शीघ्रतरं वाताच्चिन्ता बहुतरी तृणात्॥

*प्रश्ना:*

(क) 'आकाशात्' इत्यस्य कृते श्लोके किं पर्यायपदं प्रयुक्तम्?

(ख) वातात् शीघ्रगामि किम् अस्ति?

(ग) 'माता गुरुतरा' इत्यनयो: पदयो: विशेषणपदं किम्?

**प्रश्न-13** अधोलिखितानां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत— [1×4=4]

(क) भारत्यै किम् अतीव रोचते?

(ख) क: चन्दनदासं द्रष्टुमिच्छति?

(ग) संसारे कानि-कानि चक्रवत् परिवर्तन्ते?

(घ) क: देश: स्वकीये प्रथमप्रयासे मंगलग्रहकक्षम् अलभत?



downloaded from StudentSuvidha.com
Download all NOTES and PAPERS at StudentSuvidha.com

***अथवा***

अधोलिखितेषु वाक्येषु रेखाङ्कित पदमाधृत्य प्रश्ननिर्माणं कुरुत—

( क ) प्राणेभ्योऽपि प्रिय: सुहृद्।

( ख ) चौरस्य पादध्वनिना अतिथि: प्रबुद्ध:।

( ग ) उभौ शवं चत्वरे स्थापितवन्तौ।

( घ ) स्वामिन: आत्मानन्दस्य बाल्यकालस्य नाम तुलेन्द्र: आसीत्।

प्रश्न-14 अधोलिखितानां प्रश्नानामुत्तराणि हिन्दीभाषया लिखत— [1×4=4]

( क ) शृगाल: वधूं किं निर्देशितवान्?

( ख ) किं पर्व आसन्नं वर्तते?

( ग ) मंगलयानं कुत: विमुक्तम्?

( घ ) कीदृश: परिवार: वरम् अस्ति?

***अथवा***

अधोलिखितानां प्रश्नानामुत्तराणि हिन्दीभाषया लिखत—

( क ) संस्कृते महर्षिभि: किं प्रोक्तम्?

( ख ) सूर्य: चन्द्रश्च ओदनस्य कौ स्त:?

( ग ) हेमन्ते दिवसा: कीदृशा: भवन्ति?

( घ ) सर्वत्र के न भवन्ति?

downloaded from StudentSuvidha.com

प्रश्न-15 स्वपाठ्यपुस्तकात् चतस्र: सूक्ती: लिखत, या: प्रश्नपत्रेऽस्मिन् नागता: स्यु:। [1×4=4]

***अथवा***

अध: प्रदत्तसूक्तीनां हिन्दीभाषया भावार्थं लिखत—

( क ) अलसस्य कुतो विद्या।

( ख ) गतस्य शोचनं न करणीयम्।

( ग ) न्याय्यात् पथ: प्रविचलन्ति पदं न धीरा:।

( घ ) मन: पूतं समाचरेत्।



Download all NOTES and PAPERS at StudentSuvidha.com

**प्रश्न-16** स्वपाठ्यपुस्तकात् कौचित् द्वौ सुभाषितश्लोकौ लिखत। [2½×2=5]

*अथवा*

अध: द्वौ अपूर्णौ सुभाषितश्लोकौ प्रदीयते, तौ श्लोकौ स्वपाठ्यपुस्तकाधारेण पूरयत—

(*क*) केषाञ्चिदपि ——— ।

——— हस्तेषु क्षुरिका यथा॥

(*ख*) उद्यम: साहसं ——— ।

——— सहायकृत्॥

**प्रश्न-17** (*अ*) भवत: नाम दिवाकर: सिदार: अस्ति। भवत: विद्यालयस्य नाम शासकीय: उच्चतर: माध्यमिक: विद्यालय: पुसौर: अस्ति। स्वस्य अपरिहार्यकारणवशात् (किमपि) त्रिदिनात्मकम् अवकाशस्य हेतो: स्वप्राचार्यं प्रति एकम् आवेदनपत्रं लिखतु। [1+2+1=4]

*अथवा*

भवत: नाम दीपेश: अस्ति। भवान् अधोलिखितां मञ्जूषां दृष्ट्वा शुल्कमुक्त्यर्थं लिखिते अस्मिन् पत्रे रिक्तस्थानानि पूरयन् पूर्णम् आवेदनपत्रं लिखतु।

[आशासे, पञ्चम्यां, पञ्चसहस्ररुप्यकाणि, निवेदनम्, अनुग्रहीष्यति, निर्वाह:, शुल्कमुक्तये, छात्र:]

सेवायाम्

प्राचार्य:
शासकीय-उच्चतर-माध्यमिक
विद्यालय: जगदलपुरम् (छत्तीसगढम्)

विषय: (*i*) -------- प्रार्थनापत्रम्।

महोदय!

सविनयं (*ii*) -------- अस्ति यदहं भवत: विद्यालये दशमकक्षाया: (*iii*) -------- अस्मि। मम पिता एक: कृषक: अस्ति। तस्य मासिक: आय: (*iv*) -------- अस्ति। मम एक: भ्राता अष्टमकक्षायां भगिनी च (*v*) -------- कक्षायां पठति। अस्माकं कुटुम्बस्य (*vi*) -------- अतीव काठिन्येन भवति।



downloaded from StudentSuvidha.com

Download all NOTES and PAPERS at StudentSuvidha.com

अतः शुल्कमुक्त्यर्थं प्रार्थयेऽहम्। (*vii*) -------- अत्र भवान् मम एतां प्रार्थनां स्वीकृत्य (*viii*) ---------।

दिनाङ्कः — / — / —

भवतः विनीतः शिष्यः

दीपेशः

कक्षा–दशमी

(ब) अधोलिखितम् अपठितांशं पठित्वा निर्देशानुसारेण संस्कृतभाषया उत्तरत—

जनानां लोकानां वा तन्त्रं शासनं जनतन्त्रं वा कथ्यते। लोकतन्त्रे जनानां कल्याणम् एव शासनस्य प्रमुखं कार्यं मन्यते। अत्र प्रत्येकस्य जनस्य एव महत्त्वम्। भाषणे लेखने च अत्र पूर्णं स्वातन्त्र्यं भवति।

व्यवहारे केचन दोषाः अपि दृश्यन्ते। एतेषां दोषाणां दूरीकरणम् अनिवार्यम्। एतदर्थं सर्वेभ्यः शिक्षा अनिवार्या। शिक्षां विना लोकतन्त्रं सुरक्षितं न भवति।

*प्रश्नाः* [1×4=4]

(क) कां विना लोकतन्त्रं सुरक्षितं न भवति?

(ख) लोकतन्त्रे शासनस्य किं प्रमुखं कार्यं मन्यते?

(ग) लोकतन्त्रे किमर्थं शिक्षा अनिवार्या?

(घ) किं नाम लोकतन्त्रम्?

***अथवा***

(क) संस्कृतभाषया सारांशं लिखत। [3]

(ख) अपठितगद्यांशस्य उचितं शीर्षकं लिखत। [1]

**प्रश्न–18** अधः प्रदत्तविषयेषु कमपि एकमधिकृत्य संस्कृतभाषया द्वादशवाक्यैः निबन्धं लिखत— [½×12=6]

(क) सदाचारः

(ख) महाकविः कालिदासः

(ग) मम प्रदेशः (छत्तीसगढः)

(घ) ग्राम्यजीवनम्

———



downloaded from StudentSuvidha.com

Download all NOTES and PAPERS at StudentSuvidha.com